# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - आचार्य-२, सेमेस्टर-३** | **प्रश्नपत्रम् - ३** | **गुणाः - ७०** |
| **विषयः - पुराणेतिहासः** | **कोड - CC-5.3.8** | **समयः - ११-०२** |
| **दिनाङ्कः - २६.११.२०१६** | **ग्रन्थः -** *ब्रह्मवैवर्तपुराण (ब्रह्मखण्ड १ तः ३० अध्यायाः)* | |

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ कस्यचित् एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०४**

*(१) वन्दे कृष्णं गुणातीतं परं ब्रह्माच्युतं यतः ।*
*आविर्बभूवुः प्रकृति ब्रह्मविष्णु शिवादयः ॥*

*(२) स्थूलास्तनूर्विदधतं त्रिगुणं विराजं*
*विश्वानि लोमविवरेषु महान्तमाद्यम् ।*
*सृष्ट्युन्मुखः स्वकलयापि ससर्ज सूक्ष्मं*
*नित्यं समेत्य हृदि यस्तमजं भजामि ॥*

**प्रश्नः २ कस्यापि एकस्य सविस्तरं वर्णनम् कुरुत ।** **१२**

*१. श्रीराधिकायाः प्रादुर्भावः एवं तस्या सौन्दर्यम् ।*
*२. ब्राह्म आदिकल्पानां वर्णनम् ।*

**प्रश्नः ३ यथेच्छं द्वयोः प्रश्नयोः उत्तरं लिखन्तु ।** **०४**

*१. मन्मथस्य अपरं नाम किम् ?*
*२. प्रलयस्य कति प्राकाराः सन्ति ? के च ते ?*
*३. कल्पस्य कति प्रकाराः ? के च ते ?*
*४. कामदेवस्य कति बाणाः ? के च ते ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ४ कस्यचित् एकस्य श्लोकस्य व्याख्यां कुरुत ।** **०४**

*(१) अवैष्णवाद् द्विजाद् विप्र चाण्डालो वैष्णवो नरः ।*
*सगणः श्वपचो मुक्तो ब्राह्मणो नरकं व्रजेत् ॥*

*(२) सालोक्य सार्ष्टिसामीप्य सायुज्यं श्रीहरेरपि ।*
*तत्र निर्वाणमोक्षं च न हि वाञ्छन्ति वैष्णवाः ॥*

**प्रश्नः ५ कस्यापि एकस्य परिचयं लिखत ।** **०८**

*१. ब्रह्मकुमाराः ।* *२. संध्यानिरतवैष्णवब्राह्मणाः ।*

*अथवा*

*३. देवर्षेः नारदस्य पूर्वजन्मनः वृत्तान्तं सविस्तरं लिखत ।*

**प्रश्नः ६ यथेच्छं त्रयाणां लघूत्तराणि लिखत । ०३**

*१. अश्विनीकुमाराः कस्य पुत्राः ?*

*२. प्रजापतिः ब्रह्मा कस्य शापात् अपूजनीयः अभवत् ?*

*३. उपबर्हणस्य पत्न्युः नाम किम् ?*

*४. पुराणवक्तुः सूतस्य उत्पत्तिः कुत्र अभवत् ?*

*५. मालावत्याः पितुः नाम किम् ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ७ निम्नलिखितश्लोकेषु कस्यापि एकस्य व्याख्यां कुरुत । ०४**

*(१) हे धर्मं त्वमिमं धृत्वा भव साक्षी च कर्मणाम् ।*
*तपसां फलदाता च यूयं भवत मद्वरात् ॥*

*(२) पापेन जायते व्याधिः पापेन जायते जरा ।*
*पापेन जायते दैन्यं दुःखं शोको भयंकरः ॥*

**प्रश्नः ८ कस्यापि एकस्य समीक्षां कुरुत । ०८**

*१. शिवकवचम् एवं तस्य महिमा ।*

*२. आयुर्वेदस्य आचार्यपरम्परा ।*

**प्रश्नः ९ लघूत्तराणि लिखत । ( त्रयाणाम् ) ०३**

*(१) ब्रह्मखण्डे कति अध्यायाः सन्ति ?*

*(२) कृष्णकवचस्य अपरं ना किम् ?*

*(३) शिवकवचस्य अपरं नाम किम् ?*

*(४) सौतिशिवकवचं कं श्रावयति ?*

*(५) ब्रह्मणः कति पुत्राः सन्ति ?*

## चतुर्थान्वितिः ( युनिट - ४ )

**प्रश्नः १० कस्यापि एकस्य श्लोकस्य ससन्दर्भं व्याख्यां कुरुत । ०४**

*(१) विवृतं ब्रह्मकात्स्न्र्यं च कृष्णेन यत्र शौनक ।*
*ब्रह्मवैवर्तकं तेन प्रवदन्ति पुराविदः ॥*

*(२) स पिता स गुरुर्बन्धुः स पुत्रः समदीश्वरः ।*
*यः श्रीकृष्णपादपद्मे दृढां भक्तिं च कारयेत् ॥*

**प्रश्नः ११ अधोलिखितप्रश्नेषु कस्यचिद् एकस्य उत्तरं सविस्तरं दीयताम् । १२**

*(१) ब्राह्मणानां कृते भक्ष्याभक्ष्यकर्तव्याकर्तव्यकर्मणां निरूपणं ग्रन्थाधारेण कुरुत ।*

*(२) प्रकृतिदेव्याः महिमानं प्रतिपादयतु ।*

**प्रश्नः १२ यथेच्छं द्वयोः प्रश्नयोः उत्तरं लिखन्तु । ०४**

*(१) नारायणऋषेः आश्रयः कुत्रासीत् ?*

*(२) ब्रह्मखण्डे त्रिंशतितमे अध्याये कस्य महिम्नः वर्णनं विद्यते ?*

*(३) 'कृष्' शब्दः कस्य वाचकः ?*

=०=